Machchankaracharya
Sanyas grahan paddhati
संन्यास ग्रहण पद्धति
Sanskrit
Printed on paper
1956 Sambat
Folio: 35 (Folio No. 1 & 2 damage)
9.5" x 4.2"
Incomplete

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

A.153

अथ संन्या

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सं०

श्रीगणेशायनमः ॥ अस्संन्

॥ १ ॥ गिनी भार्य्या पुत्रान्प्रार्थयां ।

गृहीत्वा तदनंतर मात्मगृहश्रमा

दिशंगत्वा तत्रस्नानंकृत्वा स्वाच

रुंपश्यत् शान्तं शुशीलं सुवर्ण ब्रह्म

रहितं शोकमोहजरामृत्युक्षुत्पिपा

हौंच चेतसः प्राणस्थन्क्षुत्पिपासे

णं सम्यक्तशुद्धचैतन्यमेवंगुरुंपश्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संन्यासंप्रार्थयेत् हेगुरो त्वंब्रह्मा
गुरूर्वदति हेपुत्र संन्यासं किमर्थं
धर्मान्प्राप्तोसि पुनः शिष्यो
शोकमोहादि कर्माणि बन्धनानि
प्रसादेन श्री हरिस्मरणंकरोमि पु
संन्यासोनकर्तव्य पुनःशिष्योवदा
हेगुरोविष्णुस्वरूपिणात्वयाप्रसादः
गच्छ आचार्यस्थानेगत्वा दंडवत्प्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संकरोमि पुनराचार्येणोक्तं हे पुत्र
हे आचार्य्य दुःखंनास्तिमेमोक्षार्थं
पुनराचार्यो दीक्षांदद्यात् ओं ह्रीं
शब्दः आदौ देहशुद्ध्यर्थंपंचगव्यप
ञ्चगव्यप्राशन विधिः ॥ इति हं
रिकाश्रमदिशिगमनंच ॥ हेपुत्र
गुरुस्थाने आगत्य संन्यासंप्रार्थ
नराचार्य्यं समीपं गत्वा दण्डं

सं०
॥ २ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्तःसावधानो भवामीति ॥ इति श्री शंकराचार्य्य विरचितं संन्यासप्रार्थनाविधि संपूर्णं श्री गुरु शिष्य विचारात्कल्याणं प्राप्नोति ॥ अथपद्धत्तिः ॥ आदौवेदांताचार्य्यो ब्रह्मा द्वितीयाचार्योविष्णुः २ तृतीयाचार्योरुद्रः ३ चतुर्थाचार्योवसिष्ठः ४ पंचमाचार्यः शक्तिः ५ षष्ठाचार्यःपराशर ६ सप्तमाचार्यो व्यासः ७ अष्टमाचार्यः शुकः ८ नवमाचार्योगौडः ९ दशमाचार्योगोविंदः १० एकादशःश्रीशंकराचार्यः ११ सतयुगमध्ये आचार्यत्रयंब्रह्माबिष्णुरुद्रःदशत्रेतायुगे आधार्यत्रयंवसिष्ठशक्तिपराशराः ३ द्वापरेआचार्यद्वयंव्यासशुको २ कलियुगेआचार्यत्रयंगौडगोविन्दशंकराचार्या ३ शंकराचार्यस्यचत्वारःशिष्यास्वरूपाचार्य १ पद्माचार्य २ तोटकाचार्य ३ पृथ्वीचार्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

४ इति अथदशनामानिस्वरूपाचार्यस्य शिष्यद्वयं २ तीर्थ आश्रमश्चेतिपद्मा
चार्यस्यशिष्यद्वयं बन आरण्यश्चेति तोटकाचार्यस्य शिष्यत्रयंगिरिपर्वतसागरा
इति पृथ्वीधराचार्यस्य शिष्यत्रयं सरस्वती १ भारती २ पुरीचेति दशनामानः
संन्यासिनः अथाम्नायमठोद्धारः प्रथमेपश्चिमाम्नायेशारदा मठउच्यते कीठवारः
यंसदायस्ततीर्थाश्रमेपदे १ द्वारिकाख्यंतुक्षेत्रंस्यादेवः सिद्धेश्वरोभवेत् भद्रकाली
तु देवीस्यादाचार्योविश्वरूपकः ॥ ७ ॥ गोमतीतीर्थं ममलं ब्रह्मचारी स्वरूपकः
सामवेदस्य वक्ताच तत्रधर्मं समाचरेत् ॥ ३ ॥ द्वितीयेतुपूर्वाम्नाये भोगवर्द्धमठस्मृ
तः भ्योगवारः संप्रदायो बनरण्योपदेत्ततः । पुरुषोत्तमाख्यक्षेत्रं जगन्नाथोस्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

देवता विमलाख्या तु देवीस्यादाचार्यः पादपद्मकः ॥ ५ ॥ तीर्थं महोदधिः प्रोक्तं ब्रह्मचारीप्रकाशकः । ऋगाद्वयस्तस्यवेदस्तत्रधर्मं समाचरेत् ॥ ६ ॥ तृतीये तुतशाम्नायज्ज्योतिस्तुमठोभवेत् । आनंदवीरोविज्ञेयःसंप्रदायोस्यसिद्धिकृत् ॥ ७ ॥ पदानितस्यख्यातानिगिरिपरवतसागराः । बदरिकाश्रमं क्षेत्रं नारायणोस्यदेवता ॥ ८ ॥ देवीपुण्यागिरिक्षेपा तोटकाचार्य उच्यते । तीर्थंमलकनन्दाख्यं नंदाख्यो ब्रह्मचार्यभूत ॥ ९ ॥ तस्यवेदोप्यथर्वाख्यस्तत्रधर्मं समाचरेत् । चतुर्थेदक्षिणा म्नायेश्रृंगेरीतुमठःस्मृतः ॥ १० ॥ भूरिवाराह्वयस्तस्य संप्रदायो महोतमः पदानि त्रीणिख्यातानि सरस्वती भारतीपुरी ॥ ११ ॥ रामेश्वराह्वयंक्षेत्र मादि बाराह

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सं० देवता । कामख्यातस्यदेवीस्यात्सर्वकाम फलप्रदा ॥ १२ ॥ पृथ्वीधाराह्वय आ- ५०
॥ ४ ॥ चार्यस्तुगभद्रेचतीर्थकम् । चैतन्याख्यो ब्रह्मचारी यजुर्वेदस्यपाठकः ॥ १३ ॥ उ
क्ताश्चत्वारआम्नाया यतीनां तुष्टयेपृथक् । अथोर्ध्वशेषगावै तेपिज्ञानेन सिद्धि
दा ॥१४॥ पंचमेतूर्ध्वाम्नाये सुमेरुमठउत्तमः । संप्रदायोपिनाकीस्यात्पदंज्ञान मिधं
स्मृतं ॥१५॥ कैलाशः क्षेत्रमित्युक्तं देवतास्यनिरंजनः । देवीमायातथाचार्यईश्वरः
परिकीर्तितः ॥ १६ ॥ तीर्थमानसरःप्रोक्त त्रैलोक्यकारणंमहत् । तत्र संहारमार्गेण
संन्यासमहिमाश्रये ॥ १७ ॥ षष्ठेत्वनिचाम्नाये परमात्मामठीमहान् सत्संगोस्य
संप्रदायः पदंयोगमनुस्मरेत् ॥१८॥ नमः सरोवरंक्षेत्रं परमहंसोस्यदेवता । देवीतु ॥ ४ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मानसीमायात्वचार्यश्चेतनाद्वयः ॥ १९ ॥ त्रिकुटीतीर्थमुत्कृष्टं सर्वपुण्यप्रदायकं ।
भवपाशविनाशायसदासत्रंसमाश्रयेत् ॥ २० ॥ सप्तमोनिष्कलाम्नायःसहस्रारकञ्जे
मठः । संप्रदायोस्यतत्सच्चनतत्त्वेनसपूर्णभाक् । परब्रह्मरतोनित्यंपुरीनामापरिकीर्तित
॥२१॥इतिश्रीमच्छङ्कराचार्य्यविरचितंदशनामविधानसंपूर्णं ॥ अथ तर्पणश्रष्टश्राद्ध
वीर्यासोरुमशिखायज्ञोपवीतत्यागविधिः ॥ अथ ब्रह्मयज्ञः आचमनं प्राणायामत्रयं
कालज्ञानं परमेश्वर प्रीत्यर्थंब्रह्मयज्ञमहंकारिष्ये ॥ ओंकारस्यब्रह्माऋषिः गायत्री
छंदः परमात्मादेवताब्रह्मयज्ञे विनियोगः भूरादिमहाव्याहृतीनां प्रजापतिर्ऋषिः॥
गायत्र्युष्णिगनुष्टुपछंदांसि अग्निर्वायुः सूर्योदेवता ब्रह्मयज्ञे विनियोगः ओंभूर्भुवः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

 स्वः तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनः प्रचोदयात् इतिजपेत् आचमनं
 इतिब्रह्मयज्ञः ॥ अथ रामतर्पणं ॥ विष्णुर्विष्णुर्विराचम्य ३ स्मरणसंध्यावन्धनं
कृत्वाततः सव्येन ओं यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजंपुरस्तात् आयु
ष्यमग्र्यं प्रतिमंचशुभ्रं यज्ञोपवीतं बलमस्तुतेजः पश्चात् आचार्यस्तुर्योशिष्यहस्तेजलं
दद्यात्संकल्पंकारयेत् अद्यश्रीब्रह्मणोद्वीतीयेप्रहरार्द्धेश्री श्वेतबाराहकल्पे वैवस्वत
मन्वंतरे अष्टाविंशातिमे कलिप्रथमचरणे जम्बूद्वीपे भरतखण्डे आर्य्यावर्त्ते अमुक
पक्षे अमुकसंवत्सरे अमुकायनगतेश्रीसूर्य अमुकमासे अमुकपक्षे अमुक तिथौ
अमुकबासरे अमुक नक्षत्रे अमुकयोगे अमुककर्णे अमुकगोत्रे अमुकनामाहं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रामतर्पणंपितृतर्पणमहंकरिष्ये इतिसंकल्प। आब्रह्मभुवनाल्लोकादेवर्षिमुनिमानवाः तृप्यंतु पितरःसर्वे मातृमातामहादयः। अतीतिकुलकोटीनांसप्तद्वीपनिवासिनाम्। मयादत्तेनतोयेनतृप्यंतु भुवनत्रयं इतिरामतर्पणं। अथतर्पणप्रयोगः। गायत्रीछंदः विश्वेदेवादेवताआवाहनेविनियोगःआवाहनंविश्वेदेवाः शृणुतमहवयेअंतरिक्षेयं दिवियेउपर्यविष्ठाः ये अग्निजिह्वाउतषायजात्राआसयास्मिन्‌वार्हिषमादाय आगच्छंतु महाभागाविश्वेदेवामहावलाः तर्पिणेविहितायेचसावधानाभवंतुते कुशमूलेस्थितो ब्रह्मा कुशमध्येजनार्दनः कुशाग्रेशंकरंविद्यात्रयोदेवाव्यवस्थिता ओं वरुणायनमः ओं ब्रह्मास्तृप्यंतां ॐ देवास्तृप्यंतां ॐ छंदांसितृप्यंतां ॐ वेदास्तृप्यंतां ॐ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गायत्री तृप्यंतां ॐ ऋषयस्तृप्यंतां ॐ पुराणानितृप्यंतां ॐ आचार्या तृप्यंतां
ॐ शरसस्तृप्यंतां ॐ वानानुगास्तृप्यंतां ॐ नागास्तृप्यंतां ॐ सागरास्तृप्यंतां
ॐ यक्षास्तृप्यंतां ॐ पर्वतास्तृप्यंतां ॐ शरितःतृप्यंतां ॐ मनुष्याः तृप्यंतां
राक्षसास्तृप्यंतां पिशाचातृप्यंतां सुपर्णास्तृप्यंतां ओषधयस्तृप्यंतां भूतग्रामश्चतु
र्विधस्तृप्यंतां यमस्तृप्यंतां धर्मराज० मृत्यु० अंतकः वैवस्वतः० काल० सर्वप्राणह
रः० नीलः दध्नः० परमेष्ठिः व्रकोदरः० भीमत्रः चित्रगुप्तः तृप्यंतां कण्ठोपवीती
सनकादय ऋषयः तृप्यतां तृप्यंतां आसुरिः तृप्यंतां तृप्यंतां वोढुः पंच शिख
दक्षिणाभिमुखोपऽसव्येन सव्यजानुनिपातनम् ॐ कव्यवाडनलस्वधानमःतृप्यंतां३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ओं सोमयः यमः० अर्यमः अर्यमाः ॐ अग्निष्वाताः पितरः तृप्यंतां तृप्यंतां सोमायाःबर्हिषदःतृप्यंतां३ ॐ अमुकगोत्रः मातुतःपितृभगिनी मातृभगिनी आत्मभगिनी तथा श्वसुरीगुरुः इति सप्तगोत्राणि अस्मत्पिता अमुकस्वामीतृप्यंतां इदंजलं तस्मै स्वधानमः एवंत्रयःद्वितीयगोत्रं अमुकगोत्रं अमुकशर्मास्तृप्यंतां इदं जलं तस्मै स्वधानमःइतिद्वादश उदीरतामंगिरेसोवइतिसृणां शखःप्रजापतिर्ऋषिः त्र्युष्टुप्छंदः पितरोदेवता ऊर्ज्जमिति प्रजापतिर्ऋषिर्विराटछन्दः आपोदेवता पितृभ्य इति प्रजापतिर्ऋषित्रिष्टुप्छन्दः पितरोदेवता येचेहेति प्रजापति सरस्वत्यऋषयःत्रिष्टुप्छन्दः पितरोदेवताः मधुवाता इति त्रितपस्य गौतमऋषिःगा-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सं० यत्रीछन्दः विश्वेदेवादेवताः सर्वेषांप्रसेकास्थ्येकर्मणिविनियोगः उदीरतामवरादुत्तरा- ५०
॥ ७ ॥ सउन्मध्यमाः पितरः सोम्यासअंसुपद्द्रपुरत्वका ऋतज्ञास्तेनोतुपितरोहवेषु अंगि-
रसीनः पितरोनवग्वाअथर्वाणोभृगवः सोम्यासः तेषांवयं सुमनोयज्ञियानामपिसौम-
पाः स्याम आयंतुनः पितरः सौम्यासअग्निष्वाताः पथिभिर्देवयानैः अस्मिन्यज्ञेस्वध
यामदंतुतेवंत्वस्मान् ३ उर्जंवहंतीरमृतंघृतं पयः कीलालंपरिस्रुतंस्वधयास्थस्तर्प-
यतमेपितॄन् ४ पितृभ्यः स्वधायेभ्यः स्वधानमः पितामहेभ्यः स्वधानमः येचेहपि-
तरोयेच नेयांश्चविद्मयउचनप्रविद्यत्वंवंत्थपतिते जातवेदाः स्वधाभिर्यज्ञंसुकृतंजुष-
स्व मधुवाता ऋतायते मधुन्क्षरंतिसिंधवः माध्वीर्नः संतोषधीर्मधुनक्तमुतोषसः ७ ॥ ७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मधुमत्पार्थिवः१ रजः मधुद्यौरस्तु नः पिता मधुमान्नोवनस्पतिर्माधुमानस्तुसूर्यः माध्वी गांवोभवंतुनः पितातृप्यतां नमोवः इति याज्ञवल्क्यप्रजापतिः ऋषिः यजुः पितरोयज्ञे विनियोगः नमोवः पितरोमन्यवे नवोवः पितरः शोषायः नमोवः पितरोजीवाय नमोवः पितरोरसाय नमोवः पितरक्रूराय नमोवः पितरोवधाय अमुकगोत्रः अस्मन्माता महः अमुकशर्मा तृप्तिमखिलांपातु यश्चास्माभिर्द्रोष्टितेगृह्णंतुमयादत्तं वस्त्र निष्पीडनोदकम्। इति वस्त्रनिष्पीडनोदकम्। सव्येनाचमनंब्रह्मजज्ञानामिति प्रजापति ऋषिः त्रिष्टुप्छन्दः ब्रह्मादेवता ब्रह्मपूजनेविनियोगः। ॐ ब्रह्मजज्ञानं प्रथमंपुरस्ताद्विसीमतः सुरूचोवेनआवः सुबुध्न्या उपमा अस्यविष्टः सतश्चयोनिमासितश्चविव इति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संo ब्रह्मपूजनं। इदंविष्णुरिति मेधातिथि ऋषि:गायत्र्युष्टुप्छन्द: विष्णुर्देवता विष्णुपूज प०
॥ ८॥ नेविनियोग:। इदंविष्णुर्विचक्रमेत्रिधानिदधेपदं समूढमस्यपाꣳसुरे इति विष्णुपूजनं
नमस्ते रुद्रमन्यवे इतिमन्त्रस्य परमेष्टी प्रजापतिर्ऋषिर्गायत्रीछन्द: रुद्रोदेवता रु-
द्रपूजनेविनियोग:। नमस्ते रुद्रमन्यव उतोतईषवेनम: बाहुभ्यांमुततेनम: इति रु-
द्रपूजनं तत्सवितुरिति विश्वामित्रऋषि: गायत्रीछन्द: मित्रोदेवता सवित्रिपूजनेवि-
नियोग: तत्सवितुरितिपूजनं मित्रस्याचवर्षिणीधृति इति प्रजापति ऋषि:गायत्रीछं-
द:मित्रोदेवता मित्रपूजनेविनियोग:मित्रस्यचर्षणीधृत:श्रेष्ठोदेवस्यसानसिद्युम्नंचि
त्रश्रुवस्तमंमित्रपूजनंइमंमेवरुणोति प्रजापत्यऋषि:गायत्रीछंद:वरुणोदेवतावरुणपू ॥ ८ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जनोविनियोगः इमंमेवरुणक्ष्राधिहवमद्याच मृडपत्वाभनस्यरतके इतिवरुणपूजनं उ
त्पायअदृश्रन्नस्येतिसूर्यंऋषिः गायत्रिछंदः सूर्योदेवतासूर्योपस्थानेविनियोगः अद
श्वन्नस्येर्कतवोविरश्नयोजनांअनु अदृश्नन्नयस्केतवोभ्राजंतोअग्नयोयथा ॐहंसः
शुचिषद्वसुरतिधदक्षिणं ॐहंसःशुचिषद्वसुरंतिरिक्षसद्धोतावोदिषदतिथिर्दुरोणसत्
नृषद्वरसत्वतृरघोमसदग्वात्येशांऋतजाअद्रिजाऋत प्राच्यैदिशेनमः इंद्रायनमः
आग्नेय्यैदिशेनमः अग्नयेनमः दक्षिणायैदिशेनमः यमायनमः नैर्ऋतयेदिशेनमः
नैर्ऋतयेननः प्रतीच्यैदिशेनमः वरुणायनमः वायव्यैदिशेनमः वायवेनमः उदीच्यै
नमः सोमायनमः ईशान्यैदिशेनमः ईशायनमः उर्ध्वायैदिशेनमः ॐ ब्रह्मणेनमः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संo अग्नयेनमः पृथिव्यैनमः ओषधिभ्योनमः वाचस्पतयेनमः ॐविष्णवेनमःमरुद्- प०
॥ ९ ॥ भ्योनमः अद्भ्योनमः अपांपतयेनमः वरुणायनमः इतिप्रतिमन्त्रउदकांजलिदानं
संवचसेति परमेष्ठी ऋषिःत्रिष्टुप्छन्दः त्वष्टादेवतामुखमार्ज्जनेविनियोगः संवर्चसा
पयसासतयेभिरागन्मोहि मनसासंशिवन त्वष्टासुदत्रोविदधातुराये बुवोमार्ष्टतन्वे
यद्वलिष्टंदेवागातुविद इतिमनसस्पतिर्ऋषिविराट्छंदो देवागातुदो देवताकर्मांग
देवताविसर्जनेविनियोगः देवागातुविदोगातुवित्वागामितमनस्पतइमहे वयंजुस्वा-
हा वाचेस्वाहा वातेधास्वाहा इतितर्पणं सम्पूर्णम् ॥ अथाष्टश्राद्धाविष्णवेनमः ।
अद्भ्योनमः मरुद्भ्योनमः अपांपतयेनमः वरुणायनमः इतिप्रतिमंत्र उदकांज- ॥ ९ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लिदानं संवर्चसेति परमेष्ठीऋषिः त्रिषुप्छंदः त्वष्टादेवतामुखमार्जनेविनियोगः सं-
वर्चसापयसासंषतएभिरागमनाहि मनसासंशियेनत्वष्ठासुदत्तोविदधातुरायेनुनोमा-
ष्टेंतन्नोपह्याषिष्टंदेवागातुविद इतिमनस्पतिऋषिर्विराटछंदः देवातुविदोगातुवित्वा-
गातुमितमनसस्पति इममदेवयज्ञेस्वाहा वाचेस्वाहा वातेधाः इतितर्पणसंपूर्णम् ॥
आसनमंत्रः तज्ञसब्योन प्रथमेदेवतासनं ब्रह्माविष्णुमहेश्वराः पिंडेआसनंद्वितीये
ऋषिआसनं ब्रह्माऋषिः विष्णुऋषिः रुद्रऋषिः पिंडेआसनं तृतीयेदेवआसनं वसु-
द्रादित्याः पिंडेआसनंदर्भासनं३कंठकोपवीती चतुर्थेमनुष्यासनंसनकसनंदनसना
तनसनत्कुमाराः पिंडेआसनंदर्भासनं४पंचकेभूतासनंपृथिव्यादीनिभूतानि पिंडेआ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संनदर्भासनं ५ ततोऽव्यसव्येन षष्ठेपितुः पितामहप्रपितामहवृद्धप्रपितामहपिंडेआ-
॥ १० ॥ सनंदर्भासनं ६ सप्तमेमातामहप्रमातामह बृद्धप्रमातामहपिंडेआसनंदर्भासनं ७
अष्टमेआत्मापितुः परत्मात्मापितुः वृद्धमात्मापितुः पिंडेआसनंदर्भासनं ८
इतिपिंडेदर्भासन मन्त्रः ॥ शमीपत्रप्रमाणेन पिंडदद्याद्गयाशिरे उद्धरेत्सप्तगोत्राणि
कुलमेकोतरंशतं पृथिव्यां पानितीर्थानितान्यासुनस्थितानिचपुनः सव्येन चतु-
ष्कोणवेदिकांकृत्वाअग्निस्पर्शनं कृत्वाकुशमूलै मूर्द्धानंकृत्वा तत्रविश्वेदेवादि
पितृणामावाहनंकृत्वा ॐविश्वेदेवास्थपितरः सर्वेआयांतु अत्रस्यनोयं तिंष्टतुअ
स्मिन्कालेपिंडेगृहीत्वा गयाशिरसिगुरुकृपया विष्णुप्रसादेननृणीभवंतु ॐ प्रथमे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

देवताश्राद्धेदेवताचयेच स्नातामहेश्वरा:पिंडत्रयंदद्यात् इयंभूमिरियंगयाइदमुदकं
फल्गुतीर्थस्यपिंडे प्रेतशिलांगच्छेत् १ द्वितीयेऋषि श्राद्धेदेवतात्रयंब्रह्माऋषिर्विष्णु
ॠषिरुद्रऋषि: पिंडत्रयंदद्यात् इयंभूमिरियंगया इदमुदकंफल्गुतीर्थस्य पिंडेप्रेताशि
लांगच्छेत् २ तृतीयेदेवश्राद्धेदेवतात्रयंवसरुद्रादित्या:पिंडत्रयंदद्यात् इयंभूमिरियं
गयाइदमुदकंफल्गुतीर्थस्यपिंडेप्रेतशिलांगच्छेत् ३ चतुर्थे मनुष्यश्राद्धेदेवतात्रयं
सनकसनंदनसनत्कुमारा:पिंडत्रयंदद्यात् इयंभूमिरियंगया इदमुदकंफल्गुतीर्थस्य
पिंडदानार्थेप्रेतशिलांगच्छेत् ४ पंचमेभूतश्राद्धे देवतात्रयंपृथिव्यादिभूतेभ्य: पिंड
त्रयंदद्यात् इयंभूमिरियंगया इदमुदकंफल्गुतीर्थस्यपिंडवयं प्रेतशिलांगच्छेत् ५

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ततोऽपसव्येनषष्टेपितृश्राद्धेदेवतात्रयं पितृपितामहप्रपितामहपिंडत्रयंदद्यात्इयंभूमि
रियंगया इदमुदकं फल्गुतीर्थस्यपिंडेप्रेतशिलांगच्छेत् सप्तमेमातृश्राद्धेयद्देवतात्रयं
मातामह प्रमातामह वृद्धःप्रमातामह पिंडत्रयंदद्यात् इयंभूमिरियंगया इदमुदकंफ-
ल्गुतीर्थस्यपिंडे प्रेतशिलां गच्छेत् ७ अष्टमे आत्मश्राद्धे देवतात्रयं ॐ आत्मपि-
तुः ॐ आत्मप्रपितुः आत्मवृद्धःप्रपितुःपिंडत्रयं दद्यात् ८ इयं भूमिरियंगया इदमुद
कंफल्गुतीर्थस्य पिंडे प्रेत शिलां गच्छेत् ९ सूत्रगन्धपुष्पधूपदीपनैवेद्यतांबूलदाक्षि
णादिभिः संपूज्य विसर्जयेत् फल्गुतीर्थगयाशिरे पितृपिण्डेकरोम्यहं ममपितुस्व
र्गे बाससतस्य पिण्डंविसर्जयेत् गयास्थितो जनार्दनोदेवता ममपिण्डं गृह्णातुतत्सम

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गया सिद्धिं ददातु ब्रह्माविष्नु रुद्रा: साच्चिणो भवंतु इति अष्टश्राद्धविधिसंपूर्णः ॥
तत: सव्येन ब्राह्ममुहूर्ते गङ्गातीरं गत्वा पूर्वाभिमुखः स्थित्वा गंगासंमुखं विधिवत्
कुशकंडिकाख्य कार्यं कृत्वा ब्राह्मेमुहूर्तें बीर्या होमं कुय्यात् ॐअपवित्रःपवित्रोवा-
सर्वावस्थांगतोपिवा यः स्मरेत्पुंडरीकाक्षं सबाह्यांभ्यंतरःशुचिः १ ततो गणेशं ध्या-
येत् एकदंतं महाकायं लंबोदर गजाननं विघ्ननाशकरं देवं हेरम्बं प्रणमाम्यहं इति
ध्यानम् अथ पूजनं । विनायकनमस्तुभ्यं उमामलसमुद्भवः इमां मया कृतां पूजां
गृहाणेशसुरेश्वर २ इत्यावाहनं । अलंकारसमायुक्तं मुक्तामणिविभूषितम् स्वर्णसिं-
हासनं चारुप्रीत्यर्थं प्रतिगृह्यतां । इत्यासनं समर्पयामि नमः ३ गौरीसुत नमस्तेस्तु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सं० शंकरप्रिय कारक भक्त्यातुभ्यं मयादत्तं गृहाण प्रणतप्रिय इतिपाद्यं समर्पयामि प०
॥ १२ ॥ नमः व्रतमुद्दिश्य विघ्नेशगंध पुष्पादिसंयुतं गृहाणार्घ्यं मयादत्तं सर्वसिद्धप्रदायक
इत्यर्घ्यं समर्पयामि नमः गौरी सुतनमस्तुभ्यं लंबोदरगजानन गृहाणाच
मनीयंत्वं सर्वसिद्धिप्रदायक इत्याचमनं समर्पयामि नमः ॥ अनाथनाथसर्वज्ञ
गीर्वाण प्रतिपूजित इदं पंचामृतं देव गृहाणगणनायक ॥ इतिपंचामृतं स्ना
नंसमर्पयामि नमः ॥ गंगाजलंसमानीतं सुवर्ण कलसेस्थितं स्नानं स्वीकुरुदेवेश
कृपयागणनायक ॥ इतिशुद्धोदक स्नानं समर्पयामि नमः ॥ इदंवस्त्र मयादेव स-
मानितं मनोहरम् भक्त्यादत्तं गृहाणेश लंबोदरगजानन ॥ इतिवस्त्रं समर्पयामि ॥ १२ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नमः ॥ नानालंकारसंयुक्तं नानारत्नोपशोभितंवक्तारंसर्वशास्त्राणां तन्नमामिबृहस्प
तिम्॥५॥श्वेतकुंदमृणालाभं दैत्यानांपरमंगुरुम् । सर्वसास्त्रप्रवक्तारं भार्गवंप्रणमा-
म्यहम् ॥६॥ भिन्नांजनचयामासं रविपुत्रंमहाग्रहं छायायागर्भसंभूतं वंदेभक्त्याश-
नैश्चरम् ॥ ७ ॥ अंधकार्यं महावीर्यं चन्द्रादित्यप्रमर्दनं सिंहिकागर्भसंभूतं तंराहुंप्र-
णमाम्यहम् ॥ ८ ॥ पलालधूमसंकाशं तारकाग्रहमस्तकं । रौद्रंरौद्रात्मकं घोरंतंके
तुंप्रणमाम्यहम् ॥ ९ ॥ इदंव्यास मुखोत्पन्नं यःपठेच्च समाहितः । दिवावायदिवा-
रात्रौ तस्यशान्तिर्भविष्यति ॥ १० ॥ ऐश्वर्यमतुलंचैव आरोग्यं पुष्टिवर्द्धनं । ग्रह
नक्षत्रजापीडा तस्यनाश्चिसमुद्भवा । सर्वपाप प्रशमनं व्यासोब्रूतेनसंशयः ॥ १२ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सं० मध्येतुभास्करंविद्यात् शशिनंपूर्वदक्षिणे दक्षिणेलोहितं विंद्यात् बुधःपूर्वोत्तरेणच ॥ प०
॥ १३ ॥ उत्तरेतुगुरुंविंद्यात् पूर्वेणैवतुभार्गवं पश्चिमेतु शनिंविंद्याद्राहुं पश्चिम भागतः ॥
पश्चिमोत्तरतः केतुंस्थाप्यं वैशुक्लतंदुलैः वर्तुलमंडलंसूर्ये अर्द्धंचैवनिशाकरे त्रि-
कोणमङ्गारके चैव बुधेतु धनुषाकृति पद्माकृति गुरौविद्याच्चतुष्कोणंचभार्गवे पुरुषा
कृतिं शनौविद्याद्राहोश्चमकराकृतिं खङ्गाकृतिं लिखेत्केतुं ग्रहाकृतिप्रमाणतः शुक्रा-
र्कौ प्राङ्मुखौ विद्यात् शनि सौम्याउदङ्मुखौ पश्चान्मुखौ शनिसोमौ शेषादक्षि-
णसंमुखाः रक्तपुष्पंरविंविंद्यात् श्वेतवर्णंतुचन्द्रकं रक्तवर्णंततोभौमं पीतवर्णंततोबुधं
पीतवर्णंततोजीवं श्वेतवर्णंतुभार्गवं कृष्णवर्णंशनिंचैवराहुकेतूचधूम्रकौद्वादशांगुल ॥ १३ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मादित्यं सोमं च द्विगुणाकृतिं भौममंगुलमानंच साखिशार्द्धं बुधस्मृतं षडंगुलंभवे-
ज्जीवे भार्गवंचषडंगुलं शनेरंगुलमानं च सारिराहोश्चकीर्त्तितं पंचविंशतिमात्राच
केतवःकथिताबुधैः ॥ हस्तमात्रखनेत्कुंडं मेखलात्रयसंयुतं । मेखलाविस्तारोत्र द्वा-
दशाष्ट चतुष्टयं वेदीहस्तद्वयंकुर्यात् ॥ मंडलंचविलिख्यते आवाहयामितांदेवीं-
भूतधात्रींसुलक्षणां । कामदावैष्णवीबुद्धि सिद्धिसर्वत्रपूजनं आगच्छंतु धृतिर्मेधाम
खेगच्छवसुंधरे । सर्वमंगल संसिद्धिः यजमानस्य ऋत्विजैः आदित्यःकाश्यपोगोत्रे
अत्रिगोत्रेचचंद्रमाः भारद्वाजोभवेद्भौम आत्रेयस्तुबुधस्मृतः । जीवस्तुअंगिरोगोत्रे
शुक्रश्चैवतुभार्गवे शनिस्तुसूर्य्यजेन राहुपैठिन्यगोत्रजःकेतुजैंमिनगोत्रेण ग्रहगोत्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मुदाहृतम् ॥ अथ आवाहनं मध्येकलिंगदेशकार्तिकशुक्लसप्तम्यां जातविशाखा न
॥ १४ ॥ क्षत्रे क्षत्रियं काश्यप गोत्रं द्वादशांगुलं द्विभुजंपद्महस्तं पूर्वाभिमुखमसाश्व
वाहन मीश्वराधि दैवतं रविंध्यायेत् ॐ भूर्भुवः स्वः आदित्य इहागच्छेहातिष्ठआ
कृष्णेतिहिरण्यस्तूपऋषिं सविता देवता त्रिष्टुप्छन्दः । आदित्यप्रीतयेहोमे विनि
योगः । आकृष्णेन रजसावर्त्तमानोनि वेशयन्नमृतंमर्त्यंच हिरण्येन सवितारथेन
देवोयातिभुवनानिपश्यन् सूर्य्यायपाद्यमर्घ्यं माचमनं स्नानंचन्दनमक्षतं पुष्पं धूपं
दीपंनैवेद्यं ताम्बूलंपूगफलं दक्षिणां समर्पयामिनमःरक्तपताकादानं १ आग्नेय्यांसोमं
समुद्रेमार्गसीर्षे कृष्णेचतुर्दश्यां जातं कृतिकानक्षत्रे वैश्यमत्रिगोत्रं पश्चिमाभिमुखं ॥ १४ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अर्द्धचंद्रं द्विभुजंगदाहस्तं मृगवाहनं उमाधि दैवतं मायाप्रत्याधि दैवतं चंद्रं ध्याये
त् ॐ भूर्भुवः स्वः सोम इहागच्छ इहातिष्ठ इमंदेवेतिगौतम ऋषिः सोमोदेवता
गायत्रीछन्दः । सोमप्रीतये होमे विनियोगः इमंमेदेवाअसपत्नꣳसुवध्वंमहतेत्त्वेत्रा-
य महते ज्येष्ठायमहते जानुराज्यायेन्द्रस्येन्द्रियाय इमममुष्यपुत्रममुष्यैपुत्रमस्यावि
शएववोः मीराजासोमोस्माकं ब्राह्मणानाꣳराजाश्रीसोमाय पाद्यादिकंसमर्पयामिन
मः श्वेतपताकादानं२ दक्षिणे मंगलोजोध्यायां पौषचतुर्दश्यांजातं पूर्वानक्षत्रेभारद्वा
जगोत्रंत्त्वत्रियंचतुरंगुलं द्विभुजंत्रिकोणं दत्त्विणाभिमुखंशक्तिहस्तमेषवाहनंस्कंदाधि
दैवतंत्त्वितिप्रत्याधि दैवतं मंगलंध्यायेतॢॐभूर्भुवः स्वः कुजदेवताइहागच्छइहातिष्ठ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सं० अग्निमूर्द्धेतिविरूपाक्षऋषिःकुजोदेवतागायत्रीछंदःकुजप्रीतयेहोमेविनियोगःअग्निमू प०
॥ १५ ॥ र्द्धादिवःककुत्पतिःपृथिव्याअयंअपाᳬरेताᳬसिजिन्वतिस्वाहाश्रीमंगलायपाद्यादिकं
समर्पयामिनमः॥रक्तपताकादानं ईशानेबुधं मगधदेशोद्भवंमाघशुक्लद्वादश्यांजातं
धनिष्ठानक्षत्रे वैश्यम् अत्रिगोत्रं धनुषाकृतिं द्वादशांगुलं उत्तराभिमुखं पीतवर्णंवि-
ष्णुअधि दैवतं बुधंध्यायेत् ॥ ॐ भूर्भुवःस्वःबुधदेवता इहागच्छ इहातिष्ठ उद्बुध्य-
स्वेति अत्रिगोत्रऋषिःबुधो देवता बुधप्रीत्यये होमे विनियोगः ॥ ॐ उद्बुध्यस्वाग्ने
प्रतिजागृहीत्वमिष्टापूर्ते सᳬ सृजेथामयंच अस्मिन्सधस्थेध्युत्तरस्मिन्विश्वेदेवा य-
जमानस्य सीदथ श्री बुधाय पाद्यादिकं समर्पयामि नमः पीतपताकादानं उत्तरेगु- ॥ १५ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रुंसिंधुदेशे फाल्गुण शुक्लएकादश्यांजातं उत्तराफाल्गुणीनक्षत्रे ब्राह्मणं अंगिरसगो
त्रं षडंगुलं पद्माकारं उत्तराभिमुखं पीत वर्णं ब्रह्माधिदैवतं गुरुं ध्यायेत् ॐ भूर्भुव:
स्व:गुरोइहागच्छ इहातिष्ठ बृहस्पतिअंगिरसगोत्रऋषि:बृहस्पतिप्रीतये होमेविनि
योग:ॐ बृहस्पते अतिअदर्यो अर्हाद्दिमाद्विभातिक्रतुमज्जनेषुयद्दीदयच्छवसऋत
प्रजातत्तदस्मा सुद्राविणंधेहि चित्रंस्वाहा पूर्वेशुक्रं भगवंतदेश चैत्रशुक्लनवम्याजातं
पुष्यनक्षत्रेब्राह्मणं नवांगुलंचतुष्कोणांमंडूकबाहनमुत्तराभिमुखंशुक्लवर्णं श्वेताम्बरं
चतुर्भुज मिन्द्राधिदैवत मिंद्राणी प्रत्यधिदैवतं भृगुंध्यायेत् ॥ ओंभूर्भुव: स्व: भृगो
इहागच्छइहातिष्ठ। ॐअन्नात्परिश्रुतोरसंमितिभृगुऋषि:शुक्रप्रीतयेहोमेविनियोग:

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ॐ अन्नात्परिश्रुतोरस ब्रह्मणाव्यपिवत्क्षत्रंपयः सोमंप्रजापति ऋतेनसत्यमिन्द्रियं
॥ १६ ॥ व्यपानᳪशुक्रमंधसः इन्द्रीयस्येन्द्रीयमिदंपयोमृतं मधुस्वाहा ॥ ६ ॥ पश्चिमदिशि
अष्टम्यां रेवती संयुतायां सौराष्ट्रदेशे जातंकाश्यपगोत्रंराजभद्र पुरुषाकृतिंमण्डल
मध्यस्थशंकरश्याधिपतिंयमाधिदैवतंमायाप्रत्यधिदैवतशानिंध्यायेत्। ॐभूर्भुवःस्वः
शनिमावाहयामिशनेइहागच्छ इहातिष्ठ ॐ शन्नोदेवीरभीष्टया आपोभवन्तुपीतये
संयोरभिश्रवन्तुनः श्रीशनैश्चराय पाद्यादिकं समर्पयामि नमः कृष्णपताका दानं७
नैऋत्यांराहुजमनकदेशे ज्येष्ठ कृष्णचतुर्दश्यां जातं भरणी नक्षत्रे पैठीनासिगोत्रं
पञ्चविंशांगुलं कृष्ण मकराकृतिं दक्षिणाभिमुखं चतुर्भुजं खड्गचर्म गदाहस्तं काला ॥ १६ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धिदैवतं सर्वप्रत्यधिदैवराहुं ध्यायेत् ॐ भूर्भुवःस्वः राहो इहागच्छ इहातिष्ठ कयान-
श्चित्रेति वामदेव ऋषिःगायत्री छन्दः राहो प्रीतये होमे विनियोगःॐ कयानश्चि
त्रआभुवदूतिसदावृधःसखाकया सचिष्ठया वृता स्वाहा ८ श्रीराहवे पाद्यादिकंसम-
र्पयामि नमः कृष्णपताका दानं वायव्ये केतुं हिमवंत पर्वते आषाढ कृष्ण पञ्चम्यां
जातं भरणी नक्षत्रे जैमिन गोत्रं दक्षिणाभिमुखं षडंगुलं खड्गाकारं धूम्रवर्णं गदा
हस्तं गृध्रवाहनं चित्रगुप्ताधि दैवतं ब्रह्माप्रत्यधि दैवतं केतुन्ध्यायेत् ॐ भूर्भुवःस्वः
केतोदेवते इहागच्छ इहातिष्ठ केतुंकृण्वंति मधुतन्दऋषि गायत्री छन्दः केतुदेव
ता केतु प्रीतये होमे विनियोगः केतुंकृण्वंति केतवे पेशो मर्यादा अवे ससे समुस-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ह्रीरजायथा श्रीकेतुवेपाद्यादिकं समर्पयामिनमः कृष्णपताकादानं ९ अथ कलश
स्थापनविधिः ॥ सुसमयेशोभनंभूतलंगोमयनोपालिप्य तत्रचतुरश्रात्मकं मण्डलं
॥ १७ ॥ कृत्वाश्रीगुरुपादिष्टमार्गेण सर्वतो भद्रमंडलमष्टदलचतुरश्रात्मकं मंडलं विरच्यत
स्य कर्णिकायामंडलंकृत्वा तस्योपरिकुशानास्तीर्य ॐ ह्रीं आधारशक्तिकमलाशनाय
नमः इतिगन्धपुष्पाभ्यां संपूज्य तस्योपरि अछिद्रेपुष्टं घटं समंडलकृतं संस्थाप्य
पश्चात् शुद्धोदकेनापूर्य्य सूर्यमण्डलात् अंकुशमुद्रया ॥ गंगेचयमुनेचैव गोदावरि
सरस्वति । नर्मदेसिन्धुकावेरि जलेस्मिन्सन्निधिंकुरु ॥ इतिमंत्रेणतीर्थान्यावाह्य
धेनुमुद्रया अमृतीकृत्य ॥ अथकलशस्थापनं ॥ कलशस्यमुखे विष्णुः कंठेरुद्रः ॥ १७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

समाश्रितः। मूलेतत्रस्थितोब्रह्मा मध्येमातृगणाःस्मृताः॥ कुक्षौतुसागराः सप्त सप्त पावकसुन्दराः । ऋग्वेदोथ यजुर्वेदः सामवेदोह्यथर्वणः ॥ अंगैश्वसहिताः सर्वे कलशेतु समाश्रिताः । अत्र गायत्री सावित्री सरस्वती शान्ति पुष्टिः ॥ आयान्तु देवपूजार्थं दुरितक्षेपकारकाः ॥ सर्वेसमुद्रास्सरितः तीर्थानि जलदानदाः। ॐ आवाहयामि वरुणं शुद्धंशूद्मंसुनिर्मलं । पाशहस्तं महातेजो मकरध्वज लांछनम् ॥ नीलकेशायतं सूक्ष्मं हंसयानं महातलं । बहुकांचन मालाढ्यं संस्मरेन्मकरालयं लोकपालैश्चसहितंस्वास्तिनः प्रतिपद्यते ॥ इतिवरुणध्यानं कंठे त्रिगुणतंतुसवेष्ट्य श्वेतवस्त्रयुग्मेन परिधायतस्योपरि अक्षतनारिकेलयुतं पूगफल

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संं० पुतंशंखंसंस्थाप्य कुंकुमंचैव कर्पूरं कस्तूरीञ्चैव दापयेत् स्रग्दामवेष्टितग्रीवंमणिरत्न प०
॥ १८ ॥ प्रवालकैः एतैस्तुसहितं कुंभमंडलेतत्रस्थापयेत् धूपंदीपं च नैवेद्यं तांबूलंसमर्पया
मिनमः पश्चात्पंच पुष्पांजलिंदद्यात् ॥ इति कलशस्थापनविधिः कलशाग्रेशंखं
संस्थाप्यशंखोपरिशंखमुद्रांप्रदर्श्य गंधपुष्पाक्षतैः संपूज्य कलशेदीपमंत्रेण गुरु-
पदीष्टमार्गेण आवाह्यपूजयेत् संसारमरुकान्तारमहामोहनिवृत्तये तदिदममृतं च
क्षुर्दीपोयंप्रतिगृह्यतां शंखोदकेनमन्त्रमूच्चार्यइष्टदेवतायैस्नानंसमर्पयामिनमः।
आचमनं समर्पयामिनमः यज्ञोपवीतंसमर्पयामिनमः गन्धंसमर्पयामिनमः अक्ष
तंसमर्पयामिनमः धूपंसमर्पयामिनमः दीपंसमर्पयामिनमः नैवेद्यंसमर्पयामिनमः ॥ १८ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आचमनंसमर्पयामिनमः ताम्बूलंसमर्पयामिनमः दक्षिणांसमर्पयामिनमः नानाफ
लंसमर्पयामिनमः नीराजनंसमर्पयामिनमः दीपंसमर्पयामिनमः नैवेद्यंसमर्पयामि
नमः पश्चात्पंचपुष्पांजलिदद्यात् एवंसशंखंसम्पूज्य आचार्यउत्तराभिमुखोभूत्वा
चतुष्कोणवेदिकां कृत्वा पूर्ववदग्निस्थापनं कुर्य्यात् आदावग्निस्थापनं ध्यानम्
नवकुंकुमसंनिभं त्रिनेत्ररुचिराभंशरणंच यामिवह्निं शिवशक्तिवराभयावहैश्चानि
दोर्भिश्चरक्तंसरोरुहेनिषण्णं ॥ इतिध्यानं अग्नपसमनमत्पृथिव्यैसमनद्ययाग्निपृ
थिव्यासमनमद्दवंमुह्यंभद्रासनसत्पृथिव्यैसन्नमन्तु अथवैश्वानरलोकवासःसैकाति
थिर्वारयुताकृताघाशेषगुणेभ्रुविवह्निवाससौख्यायहोमेशाशियुग्मशेषे।प्राणार्धमा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शौ दिविभूतलेच सूर्य्ययुक्ताश्चनक्षत्रात्मानियानिस्त्रयंत्रयं आदित्यश्चेंदुर्बुधःशुक्रःश
॥ १९ ॥ निश्चन्द्रकुजस्तथा जीवोराहुश्चकेतुश्चग्रहोमेक्रूरानशोभना आदित्येचभवेच्छोको
बुधेसंपतिरुत्तमा ॥ २ ॥ शुक्रेस्थेर्च्च धनप्राप्तिशनौपीडाचजायते चन्द्रेभवतिला
भश्चभौमेचबुधवंधनं ॥ ३ ॥ गुरौपरमकल्याणंराहौर्हानिश्चजायते केतौप्रासाद
संदेहोवन्हिचक्रमुदाहृतम् ॥ ४ ॥ इतिग्रहमुखाहुतिविचारः ॥ प्रद्योतनात्पंच ५
नगां ७ क ९ सूर्य्यै १२ नवेन्दु १९ खड्विंश २६ मितेषुभेषुशेतेमहीनैव गृहं
विधेयंतडागवापीखननंनशस्तं इतिभूमिसुप्तं ॐ विष्णुर्विष्णुर्विष्णुराचम्य अप-
वित्रः पवित्रोवासर्वावस्थांगतोपिवाः स्मरेत्पुण्डरीकाक्षः सवाह्याभ्यंन्तरशुचिः ॥ १९ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ॐ आवाहयाम्यहंदेवंबहुरूपंधनुर्धरम् ब्रह्माहरिश्चरुद्रस्त्वं देवेशासुमुखोभव त्वंदेव वरदोभव परमकुंडले श्रीलोकनाथ षट्चक्रनिम्नेहव्यवाहा वाहनंसप्तजिह्वप्री तोभव ॥ ३ ॥ त्वंदेववरदोभव पवनबाहनवैश्वानरदेवताकाली कराली श्वेताधुम्रानीला रक्ताकपिलाप्रीता इहागच्छ इहातिष्ठसुप्रीतोभव अरुणीमातावरु-ण्डपीताशांडिल्यगोत्रसप्तजिह्वा आकाशऋषिःविराट्गायत्रींछन्दः वैश्वानरदेवता आगत्यपूर्वदिशितिष्ठ दक्षिणादिशितिष्ठ पश्चिमदिशितिष्ठ उत्तरदिशिस्थितोभव एकस्त्वंदेवसर्वेषुभूतेषुप्रविसंस्थितः आवाहनपूर्वकम् पूर्ववत्मंत्रंपठेत् पंचप्राणाहु-तिंदद्यात् ॐ प्राणायस्वाहा ॐ भूस्वाहा इदंभुवःस्वाहा इदंवायवे ॐ स्वःस्वा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

 हा इदंसूर्याय ॐ अग्नयेस्वाहा इदंवन्हये ॐ प्रजापतयेस्वाहा इदंप्रजापतये
॥ २० ॥ ॐ विष्णवेस्वाहा इदंविष्णवे ॐ रुद्रायस्वाहा इदंरुद्राय ॐ सूर्यायस्वाहा इदं
सूर्याय ॐ सोमायस्वाहा इदंसोमाय सूर्यादिकेतुपर्यन्तग्रहायस्वाहा इतिप्रथमेघृ-
ताहुतिंहुत्वा ॥ अथशाकल्यहोमः ततःप्राणाहुतिंदद्यात् ॐ प्राणापानव्यानसमा
नोदानामेशुध्यतांज्योतिरहं विरजाविपाप्माभूयासं स्वाहा ॥११॥ इदंप्राणादिभ्यः
ॐ मनोबुद्धिचित्तहंकारांतः करणचतुष्टयं मेशुध्यतां ज्योतिरहं विरजा विपाप्
माभूयासं स्वाहा ॥२॥ इदंमनोबुध्यादिभ्यः ॐ शिरपृथ्वी इदंप्रजायांमेशुध्यतां
ज्योतिरहंविरजाविपाप्माभूयासंस्वाहाइदंशिरसादिभ्यः ॐशब्दरूपर्शरूपरसगंधा ॥ २० ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मेशुध्यंतां ज्योतिरहं विरजाविपाप्मा भूयासंस्वाहा ४ इदंशब्दादिभ्यः ॐ अस्थि
मांसरुधिरमेदो मज्जाशुध्यंतांज्योतिरहं विरजा विपाप्मा भूयासंस्वाहा५इदमस्थि
मांसादिभ्यः नखलोमत्वचंशुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासंस्वाहा६ इदं
लोमनखादिभ्यः ॐ श्रोत्रं चक्षुर्जिह्वा घ्राण वाचौ मे शुध्यंतां ज्योतिरहं विरजा वि
पाप्मा भूयासं स्वाहा ७ इदं श्रोत्रादिभ्यः ॐ श्वेतपीत हरित लोहित पिङ्गलाख्या
मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ८ इदं श्वेतादिभ्यः ॐ क्षु-
त्पिपासातृष्णा मेशुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ९ इदं क्षुत्पि
पासादिभ्यः ॐ काम क्रोध लोभमोह हिंसा मेशुध्यंतां ज्योतिरहं विरजा विपाप्मा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सं० भूयासं स्वाहा १० इदं काम क्रोधादिभ्यः ॐ धनात्मजसत्कीर्त्ति यशांशिमेशुध्यं प०
॥२१॥ तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ११ इदं धनादिभ्यः ॐ अन्नमयप्रा
णमय मनोमयानंदमय विज्ञानमयपञ्च कोशात्मकं जीवशरीरं मे शुध्यतां ज्योति
रहं विरजा विपाप्मा भूयासं स्वाहा १२ इदमन्नमयादिभ्यः ॐ मनसा वाचा कर्म
णा शुभाशुभंयत्कृतंमया तन्मे शुध्यतांज्योतिरहंविरजा विपाप्माभूयासंस्वाहा १३
इदमिंद्रायमानसादिभ्यः ॐ सर्वेभ्यो विश्वेभ्यः स्वाहा १४ ॐ इन्द्रायस्वाहा इद
मिन्द्राय ॐ ब्रह्मणेस्वाहा इदं ब्रह्मणे ॐ विष्णवे स्वाहा इदं विष्णवे ॐ रुद्रायस्वा
हा इदंरुद्राय ॐ सोमायस्वाहा ॐ इदं सौमाय ॐ ऋग्वेदविधानायस्वाहा ॐ य ॥२१॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जुर्वेद विधानायस्वाहा ॐ सामवेद विधानायस्वाहा ॐ अथर्वणवेद विधानायस्वा
हा ॐ अर्पितनारायण प्रीत्यर्थे होमं कर्त्तव्यं मे शुध्यतां ज्योतिरहं विरजा विपा-
प्मा भूयासं स्वाहा मुक्तात्मा प्राणपञ्चाहुतिं मेशुध्यतां ज्योतिरहं विरजा विपाप्मा
भूयासंस्वाहा ॐ शीतोष्ण सुख दुःख मानापमाननिद्रालस्य षड्वर्गादि रहिते भ्यः
स्वाहा मूलेनाष्टोत्तरशताहुतिं हुत्वा बौषडंतेन पूर्णाहुतिंकुर्य्यात् भूम्यामुदकंदद्यात्
॥ इति होमविधि संपूर्णः ॥ ॐ ब्रह्मनाम प्रभावेण शिवसंध्यानवर्चसा । विष्णुमंत्र
प्रभावेण त्यक्तसूत्रोभवाम्यहम् ॥ इति यज्ञोपवीत्तोतारण मंत्रः ॥ ॐ ब्रह्मनामसह
स्त्राणि विष्णुनाम शतानिच दीयते मस्तकेस्थाने शिखाबंधं करोम्यहम् ॥ इति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिखाबन्धनम् ॥ ॐ ब्रह्मपुत्री मातंगी यशस्विनी तेजोवती दीयते मस्तकेस्थाने
॥ २२ ॥ शिखाछेदं करोम्यहं।इतिशिखाछेदनमंत्रः ब्रह्मपुत्री शिषात्वंही वालरूपातपस्विनी
मस्तकेचकृतंस्थानं गच्छदेवि नमोस्तुते॥इति शिखाहोममंत्रः ॥ अथनृसिंहमंत्रः।
ॐ श्रीं ह्रीं श्रीं जय जय लक्ष्मी प्रियायमुदिततेजसे लक्ष्मी श्रीपार्द्धदेहाय ॐ ह्रीं
श्रीं ह्रीं नमः ब्रह्माऋषि जगती छन्दः नृसिंहो देवता ह्रीं हीं दीक्षाचक्राक्ष शंखा-
म्बुजधेनुगदापटं प्रवाल रश्मिकमलाकरेण श्री नृसिंहप्रीत्यर्थं यज्ञोपवीतशिखा
घृतसंयुक्तो हृदिमध्य अवधानं करोमि सर्वं कर्म शुभाशुभं परित्यज्य ॥ इति शि
खाधानमंत्रः ॥ प्राङ्मुखो भूत्वा ॐ विष्णुरिति मंत्रेणाचम्य पश्चात्कलशमुधृत्य ॥ २२ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिखाशिरसि अभिषिंच्य नवीनवस्त्राणिपरिधाय गंधादिसमलं कृत्य पश्चात् गुरु र्मिमानीय विद्यामुपदिशेत् अथ दीक्षामंत्रः ॥ पश्चिममानीय ॐ सोहं हंसः परम हंस तत्त्वमसि पूर्वात्मानीय ॐ ब्रह्मास्मि ॐ अहं ब्रह्मास्मि ॐ उत्तरमानीय ॐ सोहंहंसः तत्त्वमसि अहं ब्रह्मास्मि दक्षिणमानीय ॐ तत्वमसि सोहं परम हंसः ॐ अकार उकार मकार अर्द्धमात्रा बिन्दुः ॐकारतदनन्तरं गुरुदेव मंत्रस्यप्राणाः यामंकृत्वा परमहंसस्य ऋष्यादि ध्यानपूर्वकं स्वहृदि मानसैरुपचारैःपूजयित्वा किं ज्ञपित्वा वह्नि नासापुटेन शिष्यस्य श्रवणे ज्योतिः प्रवेशं कृत्वा पश्चात्वष्टाक्षरा णि वदेत् वेणुध्वनि मन्त्रस्य श्रवणंक्रियते पश्चानामविधानं दत्वा इति गुरु कृ-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सं० त्यं आचार्येणउक्तं भो शिष्य! देह शुध्यर्थेतीर्थं गंतव्यं तदाज्ञांगृहीत्वा कमण्डलुं प०
करमध्ये दीयते बद्रिकाश्रम दिशां गमिष्यामि उत्तराभि मुखे शप्तपदं ग-
॥ २३ ॥ मिष्यामि इन्द्रादि लोकपालान्नमस्कृत्य पश्चादाचार्य्येण निवारितं भो शिष्य!
किमर्थ्यं तीर्थे गंतव्यं सर्वतीर्थास्पद श्री सद्गुरुचरण शेवनेतत्र सर्वप्रा-
प्स्यति तत्रवचनं प्रमाणं ध्यानं मूलं गुरोर्मूर्त्तिः पूजामूलं गुरोर्पदं मंत्रमूलंगुरो
र्वाक्यं मोक्षमूलंगुरोर्कृपा ॥ १ ॥ इत्याचार्यस्यवचनंश्रुत्वा विश्वासपूर्वकं गुर्वाश्र
मेनिवसेत् इत्याचार्यकृत्यं पश्चादाचार्यतर्जन्यगुष्ठाभ्यांदर्भंगृहीत्वा शिष्यमाहूय
शंखोदकेनशांतिक मंत्रेणाभिषिंचयेद्यथा ॐ ब्रह्माशान्तिः ॐ विष्णुशांतिः ॐ ॥ २३ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रुद्रःशान्तिः ॐ द्यौशान्तिः ॐ पृथिवीशांतिः ओं आपःशांतिः ॐ औषधयःशां
तिः ॐ बनस्पतयःशांतिः सामाशांतिः शांतिरेवविधि स्वाहा पश्चादाचार्य्यास्व-
शक्त्यानुसारेण दक्षिणांदत्वा इत्यावश्यकत्वं तदाज्ञावहसरेत् ॥ इति वीर्य्याहोमः
सम्पूर्णः अस्य श्री प्रेषोचारमंत्रस्य विष्णुऋषिःपरब्रह्म रुद्रव्याहृति छंदः पर-
मात्मा देवताःहमिति बीजं सामिति शक्तिः सोहमितकीलकं ममजन्म मृत्युरहितं
समस्त कर्म संन्यस्ते जपे विनियोगः अथ न्यासः ओं भू सन्यस्तोहमंगुष्ठाभ्यां
नमः ओं भूवःसन्यस्तोहं तर्जनीकाभ्यां नमः ओं मह सन्यस्तोहं मध्यमाभ्यां नमः
ओं भूर्भुवःस्वः सन्यस्तोहमनामिकाभ्यां नमः ओं जनः सन्यस्तोहं कनिष्ठकाभ्यां

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नमः ओं तपः सन्यस्तोहं करतलकर पृष्ठाभ्यां नमः एवं प्रकारेणांगन्यासं कुर्यात्
॥ २४ ॥ ओं पुराण पुरुषोत्तमाय नमः विष्णुर्विष्णुः परमात्मादेवता सोहमनुपस्थाने ओं भूः
संन्यस्तोहं ओं भुवः सन्यस्तोहं ओं स्वः सन्यस्तोहं ओं भूर्भुवः स्वः सन्यस्तोहं
ओं ऊर्ध्ववाहुःओंउच्चारयेत् तत्र शिखांगायत्र्यासह यज्ञोपवीतमुत्तार्य ओंभूर्भुवःस्वा-
हेति अप्सुजलेन सह जुहुयात् अभयंसर्वभूतेभ्यः किंचित्नास्तिभयं यतः स्वाहा
ओं इन्द्रोसि वज्रोसि पर्वताग्रोसि पुत्रैषणा वित्तैषणा लोकैषणा शरीरैषणा दारैषणा
कण्ठैषणा नासिकैषणाचक्षुरैषणा जिह्वैषणा इन्द्रैषणा मांसैषणा अस्थैषणासर्वकर्म
सन्यस्तोहंचिदात्मासंपत्याहिरण्येप्रातिभासंस्वासोहमितिनान्यतुकार्यमुच्यतेहिरण्य ॥ २४ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गर्भमार्तंडगार्हपत्याग्नीन्ध्रः तत्पदरूपंविज्ञानात्मापुरुषोहंब्रह्मअहंक्लींओंह्रींवीजंजाग्र
त्संस्कारं ॐअच्युतोहमनंतोहंगोविंदोहमहं हरिमायाशबलंब्रह्मप्रज्ञानमयोविश्वा
त्मावैराट्छन्दः हंसऋषिःनारायणःसौवर्णःआत्मानिपुणःब्रह्मब्रह्माहमस्मिअबलाव
स्था नसमाः पंचभूतनागकूर्मकृकरदेवदत्तंधनञ्जयाअमुकस्यशब्दहरात्माओंभूर्ब्रह्म
ऐं ह्रीं क्रौं मं त्रं जं सर्वात्मावीजं ॐ ह्रिं ह्रीं हुं फट स्वाहा इति प्रैषोच्चारमंत्रःसमाप्तः
तीर्थे गत्वा पादौ हस्तौ प्रक्षाल्य आचम्य श्रोत्र बंधनं कृत्वा आचम्य ततो जलवे-
श्मनि दिग्देवता नमस्कारः इंद्रायनमः कुवेरायनमः ईशानायनमः ब्रह्मणेनमः ऊ-
र्ध्वायनमः आधारायनमःमंडूकायनमःशिवादिगुरुपर्यंतनंत्वातीर्थेदंडस्थाप्य यावत

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्वस्थो भवेत् तावत् गुरुचरणांबुजं सिरशि ध्यायेत् ततोहृदय कमलमध्ये परब्रह्म
॥ २५ ॥ ध्यात्वा गांगोदके यामुनोदके वा स्नात्वा शुचिर्भूत्वा प्राणायामान् षडाचरेत् ॥इ-
ति विधिवत्स्नानं संपूर्णं ॥ संध्याबंधनंकुर्य्यात् ॐ मंडूकायनमः कालाग्निरुद्राय
नमःकूर्मायनमः आधारशक्तये नमः अनंताय नमः ॥ अथासन शुद्धंकुर्यात् ॐ पृ-
थिव्या मेरुपृष्टऋषिः कूर्मोदेवता सुतलंछन्दः आसने विनियोगः पृथिवीत्वयाधृ-
तालोका देवत्वं विष्णुनाधृता त्वंचधारय मांदेवि पवित्रं कुरुचासनम् ॥ अथ कर-
न्यासः ॥ ॐ भूर्ज्ञानात्मनेतु पारवर्णाय अंगुष्ठाभ्यांनमः ॐ भुवः प्रजापत्यात्मने
स्फटिकवर्णायतर्जनीभ्यांनमः ॐ स्वः सूर्यात्मने श्यामवर्णाय मध्यमाभ्यांनमः ॐ ॥ २५ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

महाब्रह्मात्मने नीलवर्णाय अनामिकाभ्यांनमः ॐ जनः ज्ञानात्मने कृष्णवर्णायकनि
ष्टकाभ्यांनमः ॐ तपः सत्यात्मने रक्तवर्णायकरतलकरपृष्ठाभ्यांनमः ॐ भूः ज्ञानात्मने
तुषारवर्णाय हृदयायनमः ॐ भुवः प्रजापत्यात्मने स्फटिकवर्णाय शिरसेस्वाहा ॐ
स्वः सूर्यात्मने श्यामवर्णायशिखायैवषट् ॐ महः ब्रह्मात्मनेनीलवर्णायकवचायहुं ॐ ज
नः ज्ञानात्मनेकृष्णवर्णायनेत्रत्रयायवौषट् ॐ तपः सत्यात्मनेरक्तवर्णायइत्यस्त्रायफट्
इति न्यासप्रणवेनव्यापकंकृत्वा प्रणवस्यांतर्यामी ऋषिः गायत्री छन्दः परमात्मादे-
वता प्राणायामे जपे विनियोगः लास्यस्य गोत्रस्य ब्रह्मपुत्रकः श्वेतवर्णः उदातस्व
रः तानानिम्नमुखः अं वीजं ॐ शक्तिः मं कीलकं मोक्षार्थे जपे विनियोगः ॐ भूः ॐ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संं० भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यंभ- प०
॥ २६ ॥ र्गोदेवस्य धीमहि धियो योनः प्रचोदयात् ॐ ह्रियादोयंविभतणासदवरोद्यागोंत्स-
रधीयोसारयो देवस्य प्रसीदार्थं ननावतु इति प्राणायामं जपित्वा एकविंशति वारं
ॐकारस्य अग्निऋषिः गायत्री छन्दः ब्रह्मादेवता क्लीं वीजं जाग्रदवस्थाभूः स्थानं
ऋग्वेदो गार्हपत्याग्नि रजो गुणः पीतवर्णः पीतस्यवर्णोविश्वात्माभुवः पृथिवीतत्वं सृ-
ष्टिक्रियाजपे विनियोगः आकारस्य वायुऋषिः त्रिष्टुप्छन्दः विष्णुर्देवता श्रीं वीजं
स्वाहा शक्तिः यजुर्वेद स्वरूपं आहवनीयाग्निः भुवः स्थानमंतरिक्षंतत्वं अनुदात्तस्व-
रः सत्वगुणाशुक्लवर्ण स्वप्नावस्थाकंठ स्थानं तैजसात् स्थितिक्रियार्थेजपेविनियोगः ॐ ॥ २६ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कारस्य सूर्य ऋषिः ज्योतिश्छंदः रुद्रोदेवता ह्रीं वीजं तामसीशक्तिः सामवेद स्वरूपं
दक्षिणाग्नि स्थानं द्यौस्तत्वं स्वरितस्वरः तमोगुणः कृष्णवर्णतृतीयवर्णप्रज्ञानात्मासु
षुप्तावस्थासंहारक्रियार्थेजपेविनियोगः अर्धमात्रावरुणऋषिःविराट्छंदः सूर्योदेवता
क्रौंवीजं सर्वं तुर्यावस्था ॐभूर्भुवःस्वःस्थानानि उदात्तनुदात्तस्वराः अथर्वणवेदसंवर्त
कोग्निःसर्ववर्णसर्वाणितुवर्णानिसर्वात्मा पृथिव्यंतरिक्षंद्यौस्तत्वंसृष्टिस्थितिसंहारार्थे
जपेविनियोगःपश्चात् जलमध्येअष्टदलपद्मंसंचिंत्यतत्रत्वंपरिवारदेवंस्वहृदयादित्य
संकाशआवाह्यअंगेनसकलीकृत्यपंचोपचारवक्रादि मनसाध्यात्वामृतावनेजनजल
ममृतवीजंस्मृत्वामूलमंत्रेणाभिमंत्र्य अष्टोत्तरशतंतर्पयेत् अंगादीन्येकैकानिसंतर्पये

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तू एवंसंतर्पयेत् पुनः पंचोपचारैर्मनसाभ्यर्च्यपश्चात् सपरिवारंदेवंहृदयेउद्यस्यसंहारं
विधायप्रणवेनद्वादशवारंजपित्वाजलंशिरसि संप्रोक्ष्यतथैवाभिमंत्र्यजलंप्रास्यश्रा
चम्यांतेप्राणायामंकुर्यात्।इतिमानससंध्या।अथमानसीपूजापंचोपचारविधिःॐलंपृ
थिव्यात्मनेगंधतन्मात्रप्रकृत्यात्मनेपरमेश्वरायआसनपाद्यार्घ्यंगंधंपरिकल्पयामि न
मःइत्यंगुष्ठयो ॐ हंआकाशात्मनेशब्दतन्मात्रप्रकृत्यानन्दात्मने परमेश्वरायपुष्पंप
रिकल्पयामिनमःइतितर्जन्योः।ॐयंवाय्वात्मनेपरमात्मनेस्पर्शतन्मात्रप्रकृत्यानंदा
त्मनपरमेश्वरायधूपं परिकल्पयामिनमः इति मध्यमयोः।ॐराज्ञामात्मने परमात्म
ने रूपतन्मात्रप्रकृत्यानंदात्मने परमेश्वरायनमः दीपंपरिकल्पयामि नमः इत्यना- ॥ २७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मिकयोः । ॐ वं आपात्मनेपरमात्मनेरसतन्मात्रप्रकृत्यानंदात्मने परमेश्वरायनै-
वेद्यंपरिकल्पयामि नमः इातकानाष्ठकाभ्यां नमः । ॐ रां शक्त्यात्मने सर्वतन्मात्र
प्रकृत्यानंदात्मने परमेश्वरायतांबूलंपरिकल्पयामि नमः इतिकरतलकरपृष्ठयोः ।
इतिमानसीपूजाविधानं ॥ अथ विश्रामोपानिषत् पूर्वदलेश्वेतवर्णेयदाविश्रामते
मनः । तदानिद्राह्यालस्यंचबुद्धिर्मंदाभवेत्तथा २ दक्षिणदलेश्यामवर्णे यदाविश्रा
मतेमनःकामरागादिकंचैव बुद्धिर्मंदाभवेतदा ३ नैर्ऋत्येदलेनीलवर्णे यदाविश्राम
तेमनः नोत्पद्येतत्तदाक्रोधोधर्मेभिन्नमतिर्भवेत् ५ वायव्यदलेश्यामवर्णे यदाविश्रा-
मतेमनः तदाह्युच्चैर्गतांचिंतवैराग्येचमतिर्भवेत् ६ उत्तरदलेपीतवर्णेयदाविश्रामते

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मनः शृंगारेनतदाभोगेकल्पनायांमतिर्भवेत् ७ ईशानदलेगौरवर्णेयदाविश्रामते
मनः तदाकृपाक्षमाज्ञानधर्मेकीर्त्तौमतिर्भवेत् ८ संधिसंधिमिश्रितानां यदाविश्राम
तेमनःतदागेहेजयेदेहे त्रिदोषेनमतिर्भवेत् ९ मध्यदलेश्यामवर्णे यदाविश्रामतेमनः
तदासर्वगुणज्ञानं त्रिदोषेनमतिर्भवेत् १० यस्यस्मरणमात्रेण सर्वपापैःप्रमुच्यते॥
यः पठतिसदाभक्त्यासायुज्यपदवींलभेत् ॥ ११ ॥ इतिविश्रामोपनिषत्समाप्ता ॥

अविकारायशुद्धाय नित्यायपरमात्मने । सदैकरूपरूपाय विष्णवेप्रभुविष्णवे॥१॥
जगदंकुरुकंदाय सच्चिदानन्ददायिने । गलिताखिलभेदाय नमःशांतायवेदसे॥२॥
रसावोधादिकंतत्र अद्वैतेत्तुनिवर्त्तते । नमस्तस्मैपरानन्द वपुषेपरमात्मने ॥ ३ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यदाज्ञानप्रभावेन दृश्यतेसकलंजगत् । यज्ज्ञानात्क्षुब्धमाप्नोति तस्मैज्ञानात्मनेनमः ॥ ४ ॥ अनात्मभूतेदेहादावात्मबुद्धिस्तुदेहिनां । साविद्यातत्कृतोवंधस्तन्नाशोमोक्षउच्यते४ अथपरमहंसानांसमाधिंव्याख्यास्यामः तच्छब्द वाच्यमविद्याशवलंब्रह्मब्रह्मणोऽव्यक्तमव्यक्तात्महत्तू महतोहंकारः अहंकारात्पंचतन्मात्राणि पंचतन्मात्रेभ्यः पंचमहाभूतानि पंचमहाभूतेभ्यः अखिलंजगत् पंचभूतानि एकैकंद्विधाविभज्यसार्धभागं विहाय इतरेषुपंचधाकृतं पंचीकरणमध्यारोपापवादाभ्यांनिष्प्रपंचप्रपंच्यते पाणिपादःपाणिपादादिलक्षणं इहात्रार्थ फलभोगवैराग्यं साधनचतुष्टयसंगावनधिकारी ॐ पंचिकृतं पंचमहाभूतानि तत्कार्यं च सर्ववैराट् इत्युच्यते सप्तदशलिं-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्तं० गभौतिकमितिहिरएयगर्भइत्युच्यते ये तत्र सूक्ष्मशरीरमात्माकर्णेषु उपसंघ्राणेषु- पo
जाग्रत्संस्कारः तत्रकारणशरीर आत्मज्ञान शुभाशुभ अव्यक्त इत्युच्यते अकार
॥ २९ ॥ उकारा मकारा ॐकारः ओंकार अहमेवं अहंसाक्षी केवलं क्षीणमात्राणि स्वरूपोहं
विज्ञानं तथा कार्यंचानित्यमुक्तं सत्यस्वभाव निर्गुणावस्थात्रयाविनिर्मुक्तः नेतिसमं
ब्रह्मैवाहमस्मि इत्यादि रूपावस्थानं समाधिः अचिंत्योहमनंतोहं गोविंदोहमहंहरिः
आनंदोहमस्मी सोहमजोहं मूर्तिरस्मि नित्योह निर्विकल्पोहं निर्विकारोहमव्ययंस-
चिदानंदस्वरूपोहंसेव्योहंसदाइतिपंचीकरणपाठः। अथमहावाक्यार्थप्रबोधप्रकारं
व्याख्यास्यामः महावाक्यमितिप्रथमं शिष्यःप्रतिज्ञापयते गुरुंप्रतिज्ञापयते गुरुंत ॥ २९ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्वमसि इतितस्मिन्वाक्येत्रिपदानिभवंतितत्पदस्य द्वावर्थौवाच्योलक्षश्चेतिमायाश
बलब्रह्मवाच्योर्थोमायाविनिर्मुक्तःसत्यज्ञानानंदादिस्वरूपंचत्वंपदस्य द्वावर्थौवाच्यो
स्थूल सूक्ष्मशरीर द्वयोरैक्यं प्रविष्टितं प्रत्यक्चैतन्य वाच्योर्थे शरीरद्वयविनिर्मुक्तःचै
तन्यलक्ष्यार्थलक्ष्यश्च तत्वमसिपदेनद्वयोरैक्य प्रवेष्टितचैतन्यलक्ष्याबोधअवरसंसा
रिणःकथमैक्यमिति विरोधस्फुरणंभवेत् ततोजहदजहल्लक्षणया सोयंदेवदत्तइति य
थादेहदेशकालपरित्यागेन चैतन्यस्वरूपमात्रंलक्ष्यतेततोखंडंकथमितिचेतिसजा
तीयविजातीयभेदरहितमितिआत्मभेदोनास्तिइतिश्रुतिःइत्याकारसंगकार्योपाधिर
यंजीवः कारणोपाधिरीश्वरः श्रुतिरपिकार्यकारणतांहित्वापूर्णबोधेविशिष्यते किंतु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सं० नित्यशुद्धबुद्धमुक्त स्वभावनिर्गुणावस्थात्रयविनिर्मुक्तः असंगतद्ब्रह्मैवाहमस्मितर- प०
॥ ३० ॥ तिशोकमात्मविद्ब्रह्मविद्ब्रह्मैवभवति इतिश्रुतेःहृदयकमलमध्येदीपवद्वेदसारं प्रणव
मयमतर्क्यंयोगिभिर्ध्यानगम्यं हरिगुरशिवयोग्यंसर्वभूतस्थमेकं सकृदपिमनसावै-
ध्यायतेयःसभक्तः इतिवेदान्तसार महावाक्यसूत्रतत्वमसिमयः संपूर्णः ॥ अथ
निर्वाणयोगपदं व्याख्यास्यामः परमहंसो हंसः सोहं परिव्राजकःपश्चिमलिंगःदिव्य
शक्ति मन्मथक्षेत्रजयाशांति श्मशानश्चेति शासनांगमहासिद्धांत अक्षय निरंजन
अमृतकल्लोलेन दीप्तःब्रह्मोदक तीर्थनिश्संशय ऋषिः निर्ममो देवता नित्यशःप्रत्य
ङ् निष्कलज्ञान ऊर्ध्वाम्नाय निरालंबन पीठसंयोग साक्षीद्वंदे विनियोगः उपदेश ॥ ३० ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दीक्षासंतोषपदद्दादशादित्यावलोकन विवेकवृत्त्वकरुणावलिरानंदमठैकत्र गुहामु-
क्तासन समदृष्टिः समगोष्टी समभाव समदर्शी ततः अनुभव व्याप्त परमहंसाय
नमः सुखगोष्ठी अविकल्पितहंसोच्चारः सर्वभूतेषु अहिंसा प्रतिपालकः दीर्घकंथउ-
दासीनःसमशीतोष्णउपदेश मनसकपत्नीदंडहंसोच्चारः ब्रह्मवलयोगपद कृपाक्षमा
पादुकास्वेच्छाचरणकः त्यक्तपरोपवादः उन्मनिगतिरुन्मन्यवस्थाहुतिप्राणनित्यगु
रूपदेश सत्यप्रकाश ॥ इति वीजं ॥ शिवयोगनिद्रा खेचरीमुद्रा परमानंद तीर्थगुरु
पादुकामुपयामि ॥ इति निर्वाणयोगपदं संपूर्णः ॥ अथ प्रसारवाक्यानि अथभिक्षु
कानां मोक्षप्रार्थिनां कुटीचर, बोधक, हंस परमहंसश्चेति चतुर्विधाः सम्यकस्वभा-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सं० ॥ ३३ ॥ ३१

वः परिकल्पते तत्रकुटीचराराणांमर्गगौतम भारद्वाजयाज्ञवल्क्य हरितप्रभजयःब्र प०
तपराःग्रामे आश्रमे अष्टग्रास भिक्षाचरणंकृत्वा योगमार्गे ज्ञाने मोक्षमेवप्रार्थयतिः
अथ बोधकानां दण्डकमण्डलुकषाय वस्त्राणि शीतोष्णजयः सप्तगृहेषु भिक्षाचर
णं इति योगमार्गे तत्वेनमोक्षमेव प्रार्थयंति हंसानां ग्रामे पुरे नगरे पंचरात्रिक्षेत्रे
सप्तरात्रि तदनंतरे नवसंति गोमूत्रगोमयाहारा चान्द्रायण वर्तिनोपि प्रातरुत्थाय
योगमार्गे तत्वज्ञाने मोक्षमेवप्रार्थयंति ३ अथ परमहंसानां वृक्षैक मूले शून्यागार
श्मशान वासिनो वा दिगंवरा व्याघ्रचर्मा वराकृष्णा जिन वासिनो तेषांधर्माधर्मौ
लाभा लाभौ शुभाशुभौ विवर्जितौ शुद्ध बुद्ध मुक्तस्वभाव समलोष्टाश्म काञ्चनच ॥ ३३ ॥ ३१

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तुर्वर्णेषु भिक्षाचरणं कृत्वा सर्वमेकमात्मानमेवपश्यंति ते परमहंसा उच्यते केपरम हंसाःसवर्तदुर्वासरोहिण्यादि जडभरतदत्तात्रेय शुकवामदेवहारित प्रभृतयः अ-व्यक्ताआचाररहिता उन्मत्तवदाचरति दंडकमण्डलु शिखासूत्र यज्ञोपवीतं स-र्वेभ्यःस्वाहा अशुभं विवर्जयत्अंधायथा रूपाभिमान रहिताः शुक्लध्यानपरायणाः अध्यात्म निष्ठाः प्राणसंधाणार्थे यथोक्त काल भिक्षाचरणं कृत्वा करोदरपात्र भूता लाभालाभौ समौकृत्वा शून्यागारे द्विविध त्रिकूट बल्मीकि वृक्षैकमूलेशाला यां अग्निहोत्रे नदीतीरे गिरिगह्वरे कंदर कुटीशणे ब्रह्ममार्गे सम्यक्संपन्नशुद्धा त्मा शुद्धासनं कृत्वा देवयात्रा तीर्थयात्रा सर्वकमात्मानं देहमध्ये पश्यति सपरम-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सं० हंस उच्यते मोक्षमेवप्रार्थयाति सर्वे देहमध्ये आत्मानं पश्यति ब्रह्मनिरूपणं इति प०
चतुराश्रमपद्धतिः ॥ योगपक्षमंत्रस्य नरनारायणऋषिः नेति नेति श्रुतिछंदः सर्व
॥३४॥ विषय परिच्छिन्नोहं देवता सर्वसाक्षिण इति वीजं मंत्र आवाहनं विज्ञानघनै
करस इति कीलकं चैतन्यं सोहं जपेविनियोगः चतुर्वेदानां ऋग्वेद प्रज्ञानमानन्द
ब्रह्माहमस्मि यजुर्वेदस्य तत्वमासि सामवेद सायमात्मा अथर्वण विज्ञानमानन्दं
ब्रह्मसत्यं ज्ञानमनंतं ब्रह्मसोहंमास्मिब्रह्मवाक्यमहंब्रह्मनसंशयःसर्वभूतस्थोहं ब्रह्म
ब्रह्मनिरामयः तत्वमासिप्राणोहमास्मिआकाशःप्राणोहमस्मिआपःप्राणोहमस्मिओं
पृथिव्याः प्राणोहमास्मि ओं वायुरहंप्राणोहमास्मितेजः प्राणोंहमस्मि त्रिगुणः ॥३४॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्राणोहमस्मि ७ बुद्धिः प्राणोहमस्मि सर्वस्य सर्वोहं विमुक्तो हमस्मि सोहं हंसः सोहं सर्वत्र सर्वदाध्यायेत् सप्राण परमात्माहं शुभाशुभकर्म भवपाश विमुक्तोहं मच्युतोहंमनंतोहं गोविन्दोहं निर्विकल्पोहं जीवशब्दावाच्योहंसदाप्राणपूर्णोहं येनजीवशब्दप्रकासोहं नित्यपरिपूर्णोहं योगपद आसनोहं सिद्धासनोहं पद्मासनोहं सिंहासनोहं शिवोहं विष्णुस्वरूपोहं आत्मापरिपूर्णोंह ऋग्वेद सामवेद यजुर्वेद अथर्वण वेदोहं ओं ह्रां ह्रूं ह्रीं ह्रूं फट्स्वाहा ॥ इतिसिंहासनयोगपठमंत्रः ॥

इतिश्रीमच्छंकराचार्यविरचितंसप्तसूत्रंसंपूर्णम्।सं० १९५६मितीमाघशुक्ला५

पता—सेठ छोटेलाल लक्ष्मीचन्द श्रीअयोध्याजी—फैजाबाद

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इति संन्यासग्रहणपद्धतिः समाप्तः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri